# E – 3506

# M. A. (Previous) Examination -2021

# SANSKRIT

## Paper Fifth

## साहित्यशास्त्रम्

Time : Three Hours ] [ Maximum Marks : 100

सूचना :– सर्वे प्रश्नाः समाधेयाः ।

### इकाई–1

**1. अ.** कौ अपि द्वौ व्याख्या विधेया – 10

i. न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।
नासौ योगो न तत्कर्म नाट्येऽस्मिन यन्न दृश्यते ।।

ii. यथाविधि यथाशास्त्रं यस्तु पूजां करिष्यति ।
स लप्स्यते शुभानर्थान स्वर्गलोकञ्च यास्यति ।।

iii. जग्राह पाठ्यमृग्वदात् समाभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथर्वणादपि ।।

vi. ततश्च विश्वकर्माणं ब्रह्मोवाच प्रयत्नतः ।
कुरू लक्षणसम्पन्नं नाट्यवेश्म महामते ।

**ब.** टिप्पणी विधेया कौ अपि द्वौ – 15

i. नाट्यवेदोत्पत्तिः ।

ii. वृत्तित्रयं आश्रित्य नाट्यप्रयोगस्यावधारणा ।

iii. रंगपीठम् ।

iv. जर्जर ।

### इकाई–2

**2. अ.** बीज बिन्दुपताकाख्यप्रकरीकार्य लक्षणाः ।
अर्थ प्रकृतयः पञ्च ता एताः परिकीर्तिताः ।
–इति सम्यग्व्याख्यायताम् । 10

**अथवा**

सर्वेषां नियतस्यैव श्राव्यमश्राव्यमेव च ।
सवेश्राव्यं प्रकाश स्यादश्राव्यं स्वगतं मतम् ।।
इति कारिका सप्रसंग व्याख्येया –

**ब.** नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः । 15
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा ।।
बुद्ध्युत्साहस्मृतिप्रज्ञाकलामान समन्वितः ।
शूरो दृढश्च तेजस्वी शास्त्रतक्षुश्च धार्मिकः ।।
इति कारिके व्याख्येये ।

**अथवा**

तदृयापारात्मिका वृत्तिश्चतुर्धा कैशिकी ।
गीतनृत्य विलासाद्यैर्मृदुः श्रृंगारचेष्टितैः ।।
इति कारिका सप्रसंग व्याख्येया ।

### इकाई–3

**3. अ.** व्याख्या विधेया कौ अपि द्वौ – 10

i. धर्मार्थकाममेक्षेषु वैचक्षण्यं कलासु च ।
प्रीतिं करोति कीर्तिं च साधुकाव्यनिबन्धनम् ।।

ii. रूपकादिरलंकारस्तयान्यैर्बहुघादितः ।
न कान्तमपि निर्भषं विभाति वनिताननम् ।।

iii. न नितान्तादिमात्रेण जायते चारूता गिराम्।
वक्राभिधेय शब्दोक्तिरिष्टा वाचामलंकृतिः ।।

vi. वैदर्भमन्यदस्तीति मन्यन्ते सुधियोऽपरे ।
तदेव च किल ज्यायः सदर्थमपि नापरम् ।।

**ब.** संदर्भपुरस्सरे व्याख्या विधेया कौ अपि द्वौ – 15

i. काव्यं सद् दृष्टातऽदृष्टार्थं प्रीतिकीर्ति हेतुत्वात् ।

ii. समग्रगुणा वैदर्भी ।

iii. लोको विद्या प्रकीर्णञ्च काव्यांगानि ।

iv. गद्य वृत्तगन्धि चूर्णमुत्कलिकाप्रायं च ।

## इकाई–4

**4. अ.** निम्नांकितेषु श्लोकेषु कयोश्चन द्वयोर्व्याख्या करणीया – 10

i. महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः ।
सागरः सूक्तिरत्नानां सेतुबन्ध्यादि थन्मयम् ।।

ii. गौर्गौः कामदुधा सम्यक् प्रयुक्ता स्मर्यते बुधैः ।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति ।।

iii. मण्डलीकृत्य बर्हाणि कण्ठैर्मधुरगीतिभिः ।
कलायिनः प्रनृत्यन्ति काले जीमूतमालिनि ।।

vi. नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम् ।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः ।।

**ब.** आचार्य दण्डिनः जीवनपरिचयं लिखत । 15

**अथवा**

सर्गबन्धस्य काव्यस्य स्वरूपादिकं काव्यादर्शानुसारेण विवेचयत् ।

***